विस्रावणानि विशेषेण बालवृद्धसुकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च त्रिकूर्च्चकेन विस्रावयेत्। तत्र प्रच्छादितवृन्तमङ्गुष्ठप्रदेशिनीभ्यां व्रीहिमुखम्। कुठारीं वामहस्तन्यस्तामितरहस्तमध्यमाङ्गुष्ठविष्टब्धयाभिहन्यात्। आराकरपत्रैषण्यो मूले। शेषाणि तु यथायोगं गृह्णीयात्। तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः। तत्र नखशस्त्रैषण्यावष्टाङ्गुले सूच्यो वक्ष्यन्ते। वडिशो दन्तशङ्कुश्चानताग्रे तीक्ष्णकण्टकप्रथमयवपत्रमुखे। एषणी गण्डूपदाकारमुखी। प्रदेशिन्यग्रपर्वप्रदेशप्रमाणा मुद्रिका। दशाङ्गुला शरारीमुखी सा कर्त्तरीति कथ्यते। शेषाणि तु षडङ्गुलानि। तानि सुग्रहाणि सुलोहानि सुधाराणि सुरूपाणि सुसमाहितमुखाग्राण्यकरालानि चेति शस्त्रसम्पत्। तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः। अतो विपरीतगुणमाददीतान्यत्र करपत्रात्तद्धि खरधारमस्थिच्छेदनार्थम्। तत्र धारा भेदनानां माषूरी। लेखनानामर्द्धमाषूरी। व्यधनानां विस्रावणानाञ्च कैशिकी। छेदनानामर्द्धकैशिकीति। तेषां पायना त्रिविधा क्षारोदकतैलेषु तत्र क्षारपायितं शरशल्यास्थिच्छेदनेषु। उदकपायितं मांसच्छेदनभेदनपाटनेषु तैलपायितं सिराव्यधनस्नायुच्छेदनेषु। तेषां निशानार्थं श्लक्ष्णशिला माषवर्णा। धारासंस्थापनार्थं शाल्मलीफलकमिति"। भवति चात्र "यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम्। सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत्"। अनुशस्त्राणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकाग्निक्षारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्गुलय इति। "शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत्। त्वक्सारादि चतुर्वर्गं छेद्ये भेद्ये च बुद्धिमान्। आहार्य्यच्छेद्यभेद्येषु नखं शक्येषु योजयेत्। विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसाम्। ये स्युर्मुखगता रोगा नेत्रवर्त्मगताश्च ये। गोजीशेफालिकाशाकपत्रैर्विस्रावयेत्तु तान्। एषण्ये-षण्यलाभे तु बालाङ्गुल्यङ्कुरा हिताः। शस्त्राण्येतानि मतिमान् शुद्धशैक्यायसानि तु। कारयेत्करणैः प्राज्ञं कर्म्मारं कर्म्मकोविदम्। प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः। तस्मात्परिचयः कार्य्यः शस्त्राणामादितः सदा"। [राजनि०।

**शस्त्रकोषतरु** पुं० शस्त्रकोषस्य हितस्तरुः। महापिण्डीतरौ

**शस्त्रजीविन्** पुं० शस्त्रेण जीवति जीव-णिनि। शस्त्रव्यापारेण युद्धादिना वृत्तिमति हेमच०।

**शस्त्रपाणि** पुं० शस्त्रं पाणौ यस्य। १शस्त्रधारके २आततायिभेदे च "शस्त्रपाणिर्धनापहः" इति स्मृतिः।

**शस्त्रमार्ज्ज** पुं० शस्त्रं मार्ष्टि मृज-अण् (शिकलकर) शस्त्रमार्ज्जनकरे शिल्पिभेदे अमरः।

**शस्त्रहत** त्रि० ३त०। १शस्त्रघातेन मृते "पक्षिमत्स्यमृगैर्ये तु दंष्ट्रिशृङ्गिनखैर्हताः। पतनानशनप्रायैर्वज्राग्निविषबन्धनैः। मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः" देवीपु० परिभाषिते २खगादिहते च। तस्याशौचादि शुद्धित० उक्तं यथा "शस्त्रघाते त्र्यहाद्रूर्द्ध्वं यदि कश्चित् प्रमीयते। अशौचं प्राकृतं तत्र सर्व्ववर्णेषु नित्यशः" व्याघ्रः "क्षतेन म्रियते यस्तु तस्याशौचं भवेद्द्विधा। आसप्ताहात् त्रिरात्रं स्यात् दशरात्रमतःपरम्"। अत्र शस्त्रघातपरं क्षतेतरशस्त्रघातपरं पारिभाषिकशस्त्रघातपरञ्च। न च शास्त्रीयव्यवहारेऽन्तरङ्गत्वेन पारिभाषिकस्यैव ग्रहणं युक्तमितिवाच्यम् श्राद्धे पारिभाषिकापरिभाषिकशस्त्रघातग्रहणवदत्रापि तथा युक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः" शु० त० रघु०।

**शस्त्रहतचतुर्दशी** स्त्री शस्त्रहतोद्देश्यकश्राद्धाङ्गं चतुर्दशी। गौणाश्विनकृष्णपक्षचतुर्दश्यां तत्र कर्त्तव्यं श्राद्धवि० दर्शितं यथा

"अथ शस्त्रहतचतुर्दशी। विष्णुः युद्धहतानां श्राद्धकर्म्मणि चतुर्दशी प्रशस्ता"।

शस्त्रयुद्धहतानामेवेति न नियमार्थम् ब्रह्मपुराणे "प्रायाऽनशनशस्त्राग्निविषोद्बन्धनिनां तथा। चतुर्दश्यां तु कर्त्तव्यं तृप्त्यर्थमिति निश्चयः" प्रायोमहापथगमनम्। वायुपुराणे "युवानस्तु गृहे यस्य मृतास्तेषान्तु दापयेत्। शस्त्रेण च हता ये वै तेषां दद्याच्चतुर्दशीम्"। युवान एव पुत्रादयो मृता इत्यर्थः। मरीचिः "विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम्। चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता"। ब्राह्मणकृतघातोऽस्यास्तीति ब्राह्मणघाती तेषां, ये च ब्राह्मणैर्हताः" इति ब्रह्मपुराणवचनात् न तु कृतब्राह्मणघातस्य पतितत्वात्। अन्येषाम् अशस्त्रादिहतानाम् एतच्च शस्त्रहतश्राद्धं विष्णादिभिः सामान्यप्रकरणालिखनात् सकलकृष्णपक्षसाधारणम् पित्रादीनामेव पार्वणविधिप्रकरणात् पार्वणविधिना कार्य्यं "सपि-